## 2015

## M. A. Part–I Examination

## SANSKRIT

### PAPER—IV

*Full Marks :* 100

*Time :* 4 Hours

*The figures in the right hand margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

### [First Half – 60 Marks]

1. 'मार्गं तावच्छृणु'—केन किं प्रति उक्तिरेषा कृता ? मेघदूतदिशा तत्रोक्तस्य मार्गस्य वर्णना कार्या । 14

अथवा

अलकायाः शोभां समुपवर्णयत ।

(Turn Over)

2. अधोलिखितयोः श्लोकयोः कस्यचिदेकस्य व्याख्या कार्या — 6

a) प्रत्यासन्न नभसि दयिताजीवितालम्बनार्थी-
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥

b) यस्यां यक्षाः सितमणिमयानेत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचिता न्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधुरतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः-पुष्करेस्वाहतेषु ॥

3. हर्षचरितपञ्चमोच्छ्वासस्यकथासारः स्वभाषया विलिख्यताम् । 14

अथवा

पञ्चमाच्छ्वासस्य सांस्कृतिकं वैशिष्ट्यं किमस्ति तद् विचार्यताम् ।

4. अधोलिखितयोः कस्यचिदेकस्य वाख्याकार्या — 6

a) माता पितृसहस्त्राणि पुत्रदारशतानि च ।
युगे युगे व्यतीतानि कस्य ते कस्य वा भवान् ॥

b) नियतिर्विधाय पुंसां प्रथम सुखमुपरि दारूणंदुःखम् ।
कृत्व लोकं तरला तडिदिव वज्रं निपातयति ॥

5. नलस्य चारित्रिकं वैशिष्ट् यं प्रतिपाद्यताम् । 14





अथवा

नैषधे पदलालित्यमिति व्याख्यायताम् ।

6. अधोलिखितयोः श्लोकयोः कस्मचिदेकस्य व्याख्या कार्या — 6

a) गिरः श्रुता एव तव श्रवः सुधाः श्लथा भवन्नाम्नि तु न श्रुति स्पृहा ।
पिपासुता शान्तिमुपैति वारिणा न जातु दुग्धान्मधनोऽधिकदापि ॥

b) महाजनाऽऽचारपरम्परेदृशी स्वनाम नामाऽऽददते न साधवः ।
अतोऽभिधातुं न तदुत्सहे पुनर्जनः किलाऽऽचारमुंच विगायति ॥

**[Second Half – 40 Marks]**

1. मृच्छकटिकमिति प्रकरणानुसारं वसन्तसेनायाः चरितमुपस्थापयत । 12

अथवा

मृच्छकटिकस्य नामकरणं यथार्थं न वेति विचार्यताम् ।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतभाषया व्याख्या कार्या — 8

क) लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत् पुरुषसेवैव दृष्टिर्विफलता गता ॥

ख) आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी यदीदं नास्ति गम्यताम् ॥

3. मुद्राराक्षसनाटकस्य कथावस्त्वनुसारं नाटकस्य विशिष्टता सम्यग्रूपेण आलोच्यताम् । 12

अथवा

मुद्राराक्षसनाटकानुसारं चाणक्यस्य चरितमुपश्यापयत ।

4. कस्यचिदेकस्य श्लोकस्य संस्कृतभाषया व्याख्या कार्या — 8

क) चीयते बालिशस्यापि सक्षेत्रपतिता कृषिः,

न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ।।

ख) प्रारभ्यते न खलु विघ्नभयेन नीचै : प्रारम्भ विघ्नविहता विरमन्ति मध्याह्न ।

विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमजना न परित्यजन्ति ।।

—o—